16-08-2020

संस्कृतसामान्यम्।
अनिवार्यपत्रम्।

## उपशास्त्री II

## तद्धितप्रत्ययः।

तद्धितप्रत्ययाः संज्ञादिशब्देन (सर्वनाम, विशेषणम्) सह प्रयुक्ताः भवन्ति। तद्धिताः प्रत्ययाः अनेकाः सन्ति तथा विभिन्नेषु अर्थेषु प्रयुक्ताः भवन्ति। कदाचित् एकैव प्रत्ययः विभिन्नार्थं प्रयच्छति।

ये तद्धितप्रत्ययाः पुत्र-पौत्रादीनर्थं ददति ते अपत्यार्थप्रत्ययाः भवन्ति। यथा- अण्, यञ्, इञ्, ढक्, यत्, घ, ठक्, अञ्, ण्य, नञ्, स्नञ्।
षष्ठ्यन्तपदेन सह अपत्यार्थकं पदं प्रयुक्तं भवति। यथा- रघोः अपत्यं पुमान् इति राघवः → रघु ङस् अण् सु

① समर्थानां प्रथमाद् वा → समर्थानां = सम्बन्धीनाम्।
प्रथमात् = प्रथमसम्बन्धिनः प्रकृत्याः।
वा = विकल्पेन। सम्बन्धीनां पदानां यस्य पदस्य प्रयोगः प्रकृत्या प्रथमः तेन सह अपत्यार्थकप्रत्ययः इञ् स्यात् विकल्पेन। यथा → दशरथस्य अपत्यम्।
अत्र द्वे सम्बन्धवाचकपदे। प्रकृत्या दशरथः प्रथमः अतएव दशरथेन सह इञ् प्रत्ययः विकल्पेन भूत्वा दाशरथिः।
अविकल्पेन दशरथस्यापत्यम्। अन्यानि उदाहरणानि → दाक्षिः, सौमित्रिः, द्रौणिः, शौरिः, कार्ष्णिः।

16-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

16-08-2020

उपशास्त्री I

प्रश्नः → हितोपदेशे वर्णितस्य चित्रग्रीव-हिरण्यककथायाः सारांशं लिखत ।

उत्तरम् → गोदावरीनदीतीरे एकः विशालः शाल्मलीवृक्षः आसीत् । तत्र विविधदिशाद्‌आगत्य रात्रौ पक्षिणो निवसन्ति स्म । एकदा व्यतीते रात्रौ प्रातःकाले लघुपतनकनामकः वायसः वने अटन्तं व्याधमपश्यत् । तं दृष्ट्वा वायसः चिन्तितः अभवत् । स व्याधः तण्डुलकणान् विकीर्य जालं विस्तीर्णं कृत्वा प्रच्छन्नो भूत्वा च स्थितः अभवत् । तस्मिन्नेवकाले चित्रग्रीवनामा कपोतराजः परिवारेन सह तत्रागतः । चित्रग्रीवेनापवारितेनाऽपि अन्याः लोभवशीभूताःकपोताः तण्डुलकणान् खादयितुं आरभन् , तदा ते सर्वे जालबद्धाः अभवत् ।

कपोतराजः चित्रग्रीवः अवदत् → विपत्तिकाले विस्मय एव कापुरुषलक्षणम् । तदत्र धैर्यधारणं कुरुत । अल्पानां वस्तूनां संहतिः कार्यसाधिका भवति अतएव वयं सर्वैः एकचित्तीभूय जालमादाय उड्डीयताम् , इति विचिन्त्य सर्वे पक्षिणः जालमादाय उत्पतिताः तथा च मूषकराजहिरण्यकस्य विवरं सम्प्राप्ताः । सर्वं वृत्तान्तं ज्ञात्वा प्रथमं तु हिरण्यकः चित्रग्रीवस्य बन्धनं छेत्तुं उद्यतः अभवत् किन्तु कपोतराजहिरण्यकस्य वचनं श्रुत्वा तदाश्रितानां बन्धनानि अच्छिन्दत् पश्चात् सर्वे कपोताः जालात् बहिः आगताः । अतएव कथितमस्ति →

" माता, मित्रं, पिता चेति स्वभावात्त्रितयं हितम् ।
कार्यकारणतश्चाऽन्ये भवन्ति हितबुद्धयः ॥" अतः
" यानि कानि च मित्राणि कर्तव्यानि शतानि च ।"

16-08-2020

डॉ० निर्मल कुमार झा, ( स० प्राचार्यः )।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

अनिवार्यपत्रम् । शास्त्री II 16-08-2020

व्याकरणछात्रहेतवः । रघुवंशम् । श्लोकव्याख्या ।

इन्दीवरश्यामतनुर्नृपोऽसौ त्वं रोचनागौरशरीरयष्टिः ।
अन्योऽन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ॥"

सन्दर्भ:→ पूर्ववत् ।

प्रसङ्ग:→ सुनन्दा या इन्दुमत्याः परिचारिका सखि वा आसीत्, सा स्वयंवरे पाण्ड्यनरेशस्य शोभां वर्णयति ।

अन्वयः→ असौ नृपः इन्दीवरश्यामतनुः त्वं रोचनागौरशरीरयष्टिः (असि) अन्योऽन्यशोभापरिवृद्धये वां योगः तडित्तोयदयोः इव अस्तु ।

शब्दार्थः व्याकरणञ्च → असौ = एषः । नृपः = पाण्ड्यनरेशः ।
इन्दीवरश्यामतनुः → इन्दीवरम् इव श्यामा तनुः यस्य सः = नीलकमलश्यामशरीरः । त्वं = भवती, इन्दुमती ।
रोचनागौरशरीरयष्टिः → रोचना इव गौरी शरीरम् एव यष्टिः यस्याः सा = गोरोचनागौरशरीरयष्टिः । असि = वर्तसे ।
अन्योऽन्यशोभापरिवृद्धये → अन्योऽन्यस्य शोभायाः परिवृद्धिः, तस्यै = परस्परसौन्दर्यप्रकर्षाय । वां = युवयोः ।
योगः = सङ्गतिः । तडित्तोयदयोः = विद्युन्मेघयोः ।
तोयदश्च तडिच्च, तयोः तडित्तोयदयोः ।

तात्पर्य:→ सुनन्दानुसारेण नीलकमलसदृशोऽयं पाण्ड्यनृपतिः गोरचनागौरशरीरया त्वया वरेण्यः । उभयोः सङ्गतिः विद्युन्मेघयोरिव तदा नूनं भविष्यति इति भावः ।

विशेष:→ अत्र शृङ्गाररसः, वैदर्भीरीतिः,
प्रसादयुक्तमाधुर्यगुणः,
उपमालङ्कारः, उपजातिवृत्तञ्च ।

डॉ॰ निर्मल कुमार झा, (स॰ प्राचार्यः)
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ ।